M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.

Ser. 266

Title: Sandhya Vidhi

266

Incomplete

Sandhya Vidhi : **Title**

: Author

: Editor

: Year, Vols.

: Publisher

266 : Remarks

श्रीगणेशायनमः॥ ॐ केशवाय नमः॥ नाराय॰ माधवाय॰॥ गोविंदा
य॰ विष्णवेन॰ श्री मधुसूदनायन॰॥ त्रिविक्रमाय॰॥ वामनाय॰॥
श्रीधराय॰॥ हृषीकेशाय॰॥ १०॥ पद्मनाभाय॰॥ दामोदराय॰॥ संक
र्षणाय॰॥ वासुदेवाय॰॥ प्रद्युम्नाय॰॥ अनिरुद्धाय॰ पुरुषोत्तमा॰
अधोक्षजाय॰॥ नारसिंहाय॰॥ अच्युताय॰॥ जनार्दनाय॰॥ उ
पेंद्राय॰॥ हरयेय॰॥ श्रीकृष्णाय॰॥ द्विराचम्य॰॥ प्रणवस्य॥
परब्रह्म ऋषिः॥ परमात्मा देवता॥ दैवी गायत्री छंदः॥ स
प्तानांम्याहृतीनां विश्वामित्र जमदग्निर्भरद्वाज गोतम अ

त्रिर्वेसि छकश्यपाऋषयः॥ अग्निर्वायुः सूर्योबृहस्पतिर्वरुणेंद्रा
संध्या विश्वेदेवादेवता॥ देवीगायत्रीछंदः॥ देवीगायत्रीउष्णिकु अनु
३ ष्टुप्॥ बृहती पंक्तित्रिष्टुप्॥ जगती छंदांसि॥ गायत्र्योगा॥
यिनो विश्वामित्रऋषिः॥ सवितादेवता॥ गायत्रीछंदः॥
शिरोमंत्रस्य॥ वामदेवऋषिः॥ परब्रह्मदेवता॥ आसुरी १
गायत्रीछंदः॥ एतेषांप्राणायामे विनियोगः॥ ॐ भूः ॐ राम
भुवः ॐ स्वः ॐ महः ॐ जनः॥ ॐ तपः ॐ सत्यं॥ भूर्भुवः

स्वः॥ ॐ तत्स०॥ ॐ आपो ज्योतिरसोमृतं ब्रह्म भूर्भुवस्वरो
म्॥ ममोपात्तदुरितक्षयद्वारा श्री परमेश्वर प्रीत्यर्थं प्रात
संध्यामुपासर्ह यीष्ये॥ आपोहिष्ठेति त्रि ऋचस्य॥ ओंब
रीषः सिंधुद्वीपऋषिः॥ आपोदेवता॥ गायत्रीछंदः॥ मार्जे
नेविनियोगः॥ ॐ आपोहिष्ठामयोभुवः॥ ॐ ता न ऊ
र्जेदधातन ॐ महेरणाय चक्षसे॥ ॐ यो वः शिवतमोरसः॥
ॐ तस्यभाजयतेहनः॥ ॐ उशतीरिवमातरः॥ ॐ तं

संध्या स्मा अरंगमाव को।ॐ यस्यक्षयायजिन्वथ।।ॐ आपोजनय
थाचनः।।ॐ सूर्यश्चेतिमंत्रस्य।।याज्ञवल्क्यउपनिषद
ऋषिः।।सूर्यमामन्युमन्युपतयोरात्रिश्चदेवताप्रकृ
२।। ती पुरुशं छंदः।।अभ्यंतरशुध्यर्थे अपप्राशाने विनि
योगः।।ॐ सूर्यश्चमामन्युश्चमन्युपतयश्चमन्युकृते २।।
भ्यः।।पापेभ्यो रक्षंतां यद्रात्रिया पापमकार्षं।।मनसा पा
वाचाहस्ताभ्यां।।पद्भ्यामुदरेण शिश्नारात्रिस्तदवलु

पतुयत्किंचदुरितंमयि।।इदमहंमाममृतयोनौ सूर्ये ज्योतिषि जुहो
मिस्वाहा।।ॐ केशवायनमइति आचम्य।।ॐ आपोहिष्ठेति नव
ऋचस्यसूक्तस्य।।अंबरीषः सिंधुद्वीपऋषिः।।आपोदेवता।।
गायत्री छंदः।।पंचमि वर्धमाना सप्तमीप्रतिष्ठा।।अंतेद्वे अनुष्टुभौ।।
मार्जने विनियोगः।।ॐ आपोहिष्ठामयोभुवस्तानऊर्जेदधातन।।
महेरणायचक्षसे।।ॐ योवःशिवतमोरसस्तस्यभाजयतेहनः।।उ
शतीरिवमातरः।।ॐ तस्मा अरंगमाम वोयस्यक्षयायजिन्वथ।।

संध्याः आपोजनयथाचनः।।ॐ शंनोदेवीरभिष्टय आपोभवंतुपीतये
।।शंयोरभिस्रवंतुनः।।ॐ ईशानावार्याणांक्षयंतीश्चर्षणीनां।।अपो
२ याचामिभेषजं।।ॐ अप्सुमेसोमो अब्रवीदंतर्विश्वानिभेषजा।। नि
अग्निंचविश्वशंभुवं।।ॐ आपःपृणीतभेषजंवरूथंतन्वे३म
म।।ज्योक्चसूर्यंदृशे।।ॐ इदमापःप्रवहतयत्किंचदुरितंमयि ३।।
यद्वाहमभिदुद्रोहयद्वाशेपउतानृतं।।ॐ आपोअद्यान्वचारि
षंरसेनसमगस्महि।।पयस्वानग्नऽआगहितंमासंसृजवर्चसा।।ग ४